# shrIpAdasaptati by shrInArAyaNabhaTTa

# શ્રીનારાયણભટ્ટપાદવિરચિતા શ્રીપાદસપ્તતિઃ

## Document Information

Text title : nArAyaNabhaTTapAdavirachitA shrIpAdasaptatiH 08 27

File name : shrIpAdasaptati.itx

Category : devii, stotra, devI

Location : doc_devii

Transliterated by : Ramu, Ramesh Natarajan, Shibin PK, Sugesh, Achari, Rajmohan, Ranjana, Jayati, Shankara

Proofread by : Shankara shankara_2000 at yahoo.com, PSA Easwaran

Description-comments : From stotrArNavaH 08-27

Latest update : August 13, 2011, June 14, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીનારાયણભટ્ટપાદવિરચિતા શ્રીપાદસપ્તતિઃ

દક્ષાધઃકરપલ્લવે લસદસિં દક્ષોર્ધ્વગે શૂલિનીં
વામોર્ધ્વે ફલકોજ્જ્વલાં કટિતટન્યસ્તાન્યહસ્તામ્બુજામ્ ।
શૂલાગ્રાહતકાસરાસુરશિરોનિષ્ઠાં પ્રહૃષ્ટાં સુરૈર્-
જુષ્ટામિષ્ટફલપ્રદાં ભગવતીં મુક્તિસ્થલસ્થાં ભજે ॥ ૧॥

યત્સંવાહનલોભિનઃ શશિકલાચૂડસ્ય હસ્તામ્બુજ-
સ્પર્શેનાપિ ચ લોહિતાયતિ મુહુસ્ત્વત્પાદપઙ્કેરુહમ્ ।
તેનૈવોદ્ધતકાસરાસુરશિરશ્શ‍ૃઙ્ગાગ્રસઞ્ચૂર્ણન-
પ્રાચણ્ડ્યં તદનુષ્ઠિતં કિલ કથં મુક્તિસ્થલસ્થે! શિવે! ॥ ૨॥

ત્વત્પાદં નિજમસ્તકે ઘટયિતું કે કે નુ લોકે જનાઃ
કિં કિં નારચયન્તિ દુશ્ચરતપશ્ચર્યાસપર્યાદિકમ્ ।
મન્યે ધન્યતમં તુ દેવિ! મહિષં વૈરસ્થયૈવ ત્વયા
યન્મૂર્ધ્નિ સ્વયમેવ પાતકહરં પાદામ્બુજં પાતિતમ્ ॥ ૩॥

ત્વત્પાદામ્બુજમર્પિતં ક્વ નુ શિવે! કિન્નુ ત્રયીમસ્તકે?
નિત્યં તત્ત્વવિચારદત્તમનસાં ચિત્તામ્બુજાગ્રેષુ વા? ।
કિં વા ત્વત્પ્રણયપ્રકોપવિનમન્મારારિમૌલિસ્થલે?
કિં પ્રોત્ખણ્ડિતઘોરસૈરિભમહાદૈત્યેન્દ્રમૂર્દ્ધાન્તરે? ॥ ૪॥

ત્વત્પાદાઞ્ચલરૂપકલ્પલતિકાબાલપ્રવાલદ્વયં
યે તાવત્કલયન્તિ જાતુ શિરસા નમ્રેણ કમ્રોજ્જ્વલમ્ ।
તેષામેવ હિ દેવિ! નન્દનવનક્રીડાસુ લભ્યં પુનઃ
સ્વર્વલ્લીતરુણપ્રવાલભરણં સેવાનુરૂપં ફલમ્ ॥ ૫॥

ધાવલ્યં પરિલાલ્યતે પુરરિપોરઙ્ગેન તુઙ્ગશ્રીયા
કિઞ્ચ શ્યામલિમાપિ કોમલતરે ભાત્યેવ ગાત્રે હરેઃ ।
તત્તાદૃક્પદવીં મમાપિ જનયેત્યસ્તોકસેવારસા-
દારુણ્યં તવ લીયતે ચરણયોઃ કારુણ્યમૂર્તે! શિવે! ॥ ૬॥

આરુણ્યં યદિદં ત્વદીયપદયોરાભાતિ, તત્કેચન
પ્રાહુસ્તુઙ્ગનિતમ્બભારભરણક્લાન્ત્યા કિલોપાગતમ્ ।
અન્યે માહિષમૂર્દ્ધપેષમિલિતં રક્તદ્રવં મન્વતે
મન્યેઽહં તુ નતેષુ સાન્દ્રમનુરાગોદ્ગારમેવાનયોઃ ॥ ૭॥

પ્રાહુઃ પદ્મસમાશ્રયં શતધૃતિં ત્વત્પાદપદ્માશ્રયા-
દન્તસ્ત્વત્પદપદ્મવીક્ષણવશાત્કૃષ્ણોऽપિ પદ્મેક્ષણઃ ।
યત્પદ્માર્ચનમામનન્તિ સુધિયો દારિદ્ર્યવિદ્રાવણં
મુક્તિક્ષેત્રગતે! ભવાનિ! તદપિ ત્વત્પાદપદ્માર્ચનમ્ ॥ ૮॥

પાદં તે સરસીરુહદ્રુહમિમં યત્સેવતે પદ્મભૂ-
ર્નૂનં તત્સ્વનિવાસપઙ્કજવરશ્રીલઙ્ઘનાશઙ્કયા ।
ગોવિન્દોઽપિ ચ વારિરાશિદુહિતુર્વાસાબ્જબાધાભિયા
સ્વસ્યૈવાગ્રકરોદ્ગૃહીતકમલત્રાણાભિલાષેણ વા ॥ ૯॥

સેવન્તે કુલસમ્પદે નખમયાઃ શીતાંશવસ્ત્વત્પદં
તત્પાકો નનુ વીક્ષ્યતે હિ નિતરામન્યેષુ શીતાંશુષુ ।
એકો બાલક એવ મૌલિમયિ! તે યાતો, લલાટાત્મતા-
મન્યો નિર્મલમણ્ડલદશામન્યૌ તુ ધન્યૌ ગતૌ ॥ ૧૦॥

ઘોરં પાદસહસ્રકં પ્રકટયન્નાશાસુ ભાસાં પતિ-
ર્ધ્વાન્તં નો પુનરાન્તરં શમયિતું શક્નોતિ શૈલાત્મજે! ।
ત્વત્પાદદ્વિતયેન કોમલતરેણાનેન ચેતઃસ્પૃશા
જન્તૂનાં બહિરન્તરન્ધતમસં કૃન્તત્યનન્તં શિવે! ॥ ૧૧॥

સૂર્યેન્દ્વગ્નિસમીરણાદિસકલસ્વર્વાસિનામુન્મદઃ
સર્વાણ્યેવ પદાનિ યો મથિતવાન્ દુર્વારશૌર્યોષ્મણા ।
તં ઘોરં મહિષાસુરં નિજપદેનૈકેન સમ્મૃદ્નતી
યત્ત્વં પ્રત્યકૃથાસ્તતઃ કિમપરં ત્વદ્વૈભવં બ્રૂમહે ॥ ૧૨॥

એકં વામતયૈવ, દક્ષિણતયૈવાન્યત્પદં દેહિનાં
ખ્યાતં મુક્તિપુરાધિવાસિનિ! શિવે!, ચિત્રં ત્વયિ ત્વીદૃશમ્ ।
આનમ્રેષુ જનેષ્વભીષ્ટકરણે પાદાવુભૌ દક્ષિણા-
વાનમ્રે તુ કૃતાગસિ સ્મરહરે વામાક્ષિ! વામાવુભૌ ॥ ૧૩॥

આનમ્રસ્ય પુરદ્રુહઃ શિરસિ તે પાદાબ્જપાતઃ શિવે!

જીયાદ્યેન બભૂવ પઙ્કજવતી મૌલિસ્રવન્તી ક્ષણમ્ ।
કિઞ્ચોદઞ્ચિતબાલપલ્લવવતી જાતા જટાવલ્લરી
લાક્ષાપાતવશેન સાન્ધ્યસુષમાસાન્દ્રા ચ ચાન્દ્રી કલા ॥ ૧૪॥

દૃષ્ટ્વા રાત્રિષુ ચન્દ્રપાદજનિતાં પાથોરુહાણાં વ્યથાં
દેવિ! ત્વં કરુણાકુલેવ કુરુષે તદ્વૈરનિર્યાતનમ્ ।
માનાનમ્રમહેશમૌલિવલભીવાસસ્ય શીતત્વિષો
નિત્યં પઙ્કજપાદઘાતજનિતા બાધા યદાધીયતે ॥ ૧૫॥

સમ્ભ્રાન્તિસ્તવ દેવિ! સા વિજયતે માનાવનમ્રે શિવે!
ત્વત્પાદામ્બુરુહપ્રહારમુદિતે મન્દં સમુત્થાયિનિ ।
લાક્ષારાગરસારુણં નિપતિતં ગઙ્ગાપયશ્શીકરં
દૃષ્ટ્વા શોણિતશઙ્કયા તરલિતા કાન્તં યદાલમ્બથાઃ ॥ ૧૬॥

સા પાદદ્વિતયાહતિર્જયતિ તે, યસ્યાં ગિરીન્દ્રાત્મજે!
પ્રાચીનેન્દુયુતે નખેન્દુદશકે મૌલિસ્થલીસઙ્ગતે ।
સ્વસ્યૈકાદશમૂર્તિતાસમુચિતાનેકાદશૈવોડુપા-
નાબિભ્રાણ ઇવાબભૌ સ ભગવાનેકોઽપિ રુદ્રઃ સ્વયમ્ ॥ ૧૭॥

કિં વૈરિઞ્ચકરોટિકોટિનિહતં કિં વા ફણિગ્રામણી-
નિશ્વાસાનિલખેદિતં ન્વિદમિતિ પ્રેમાર્દ્રસલ્લાપિના ।
માનસ્યોપશમે કરેણ શનકૈરામૃદ્નતા શમ્ભુના
ભૂયશ્ચુમ્બિતમમ્બુજદ્યુતિ પદં ધ્યાયામિ માયે! તવ ॥ ૧૮॥

પૂર્વં જહ્નુસુતા સકૃન્મુરરિપોઃ શ્રીપાદસઙ્ક્ષાલના-
પુણ્યાદીદૃશવૈભવા સમભવદ્ગોવિન્દવન્દ્યે! શિવે! ।
સેયં સમ્પ્રતિ શમ્ભુમૌલિનિલયા માનપ્રસઙ્ગાનતૌ
નિત્યં ત્વચ્ચરણાવસેચનભુવા પુણ્યેન કીદૃગ્ભવેત્? ॥ ૧૯॥

પૂર્વં વ્યાકરણપ્રપઞ્ચનવિધૌ લબ્ધ્વાપ્યનેકં પદં
કિં નો તૃપ્તિમગાદગાધિપસુતે! શેષઃ ફણિગ્રામણીઃ ।
આલીનઃ શશિમૌલિમૂર્દ્ધનિ ચિરં પ્રેમપ્રકોપાનતૌ
લબ્ધું તે પદમેકમેવ કુતુકી નિત્યં યતો વર્તતે ॥ ૨૦॥

તિષ્ઠન્ત્યાં પ્રણયપ્રકોપવશતો બાષ્પાકુલાક્ષ્યાં ત્વયિ
શ્રીકણ્ઠે નખદર્પણપ્રતિફલદ્રૂપે પુરોવર્ત્તિનિ ।
પાદાગ્રે પતિતોઽયમિત્યભિહિતે સખ્યા, તવાલોકનં

લોલં પાદતલે વિભાતિ સહસા સાકોપમાલીમુખે ॥ ૨૧॥

કાન્તાલોકનલજ્જયા વિનમિતે કાન્તે મુખામ્ભોરુહે
યાસૌ ભૂતલપાતુકા નયનયોઃ શોભા તવાભાસતે ।
સા તાવત્તરુણારુણામ્બુજયુગભ્રાન્ત્યા ત્વદઙ્ઘ્રિદ્વય-
પ્રાન્તે ભાતિ મરન્દપાનકુતુકભ્રાન્તેવ ભૃઙ્ગાવલી ॥ ૨૨॥

કિં બ્રૂમઃ કુટિલાત્મકોઽપિ કબરીભારસ્ત્વદીયઃ શિવે!
કેલીવિશ્લથિતસ્તનોતિ યદયં ત્વત્પાદસંસ્પર્શનમ્ ।
તત્ભૂયઃ સુમનોગણાદૃતગુણસ્ત્વન્મૌલિસંલાલ્યતાં
ધત્તે; ચિત્રમસૌ, ત્વદઙ્ઘ્રિભજનાત્કિં કેન નો લભ્યતે? ॥ ૨૩॥

રાગદ્વેષમુખા હિ વિભ્રમભરા નશ્યન્તિ વિશ્વેશ્વરિ!
ત્વત્સઙ્ગાદિતિ મુક્તિદેશનિલયે! મિથ્યા જનૈઃ કથ્યતે ।
ઉદ્યદ્વ્ેષમુદારવિભ્રમભરં ગાત્રં દધત્યા ત્વયા
રાગોઽપિ ધ્રિયતેઽધિકં ચરણયોઃ શોણામ્બુજચ્છાયયોઃ ॥ ૨૪॥

દેવિ! ત્વત્પદસત્પરાગમનિશં મૌલૌ સમાબિભ્રતાં
સાધૂનામપરાગતૈવ ભવતીત્યાશ્ચર્યમાસ્તામિદમ્ ।
પાદસ્તે નખરપ્રભાવલસિતો જાગર્તિ સોઽયં પુન-
શ્ચિત્રં નામ ખરપ્રભાવલસિતો દુષ્ટાસુરં પિષ્ટવાન્ ॥ ૨૫॥

દ્વિત્વેન સ્થિતયોસ્ત્વદીયપદયોર્દ્વૈતં નિરસ્ય સ્ફુટં
કૈવલ્યપ્રતિપાદને કુશલતા જાતેતિ કોઽયં ક્રમઃ ? ।
કિં વા યુક્તિભિરત્ર, મુક્તિકરતા વ્યક્તૈવ તે પાદયો-
ર્મુક્તા એવ હિ વિસ્ફુરન્તિ વિમલાસ્તત્સઙ્ગિનોઽમી નખાઃ ॥ ૨૬॥

પાદાગ્રં તવ કામદં સુરલતાશાખાગ્રમાચક્ષ્મહે
જાતા યત્ર હિ બાલપલ્લવરુચિઃ સ્વૈરેવ રાગોદયૈઃ ।
ઉત્સર્પન્નખમણ્ડલીસુષમયા પુષ્પાલિરુત્પાદિતા
સઞ્જાતાલિરુતિશ્ચ મઞ્જુલતરૈર્મઞ્જીરશિઞ્જારવૈઃ ॥ ૨૭॥

દેવીયં તવ સન્નતેશમકુટસ્વર્લોકકલ્લોલિની-
કલ્લોલાહતિભિર્વિશેષવિમલા જીયાન્નખશ્રેણિકા ।
યદ્ભાવલ્યમવાપ્તુમાત્તકુતુકાસ્તોયે તપસ્યન્ત્યમી
દીનાઃ ફેનકણાશ્ચ મૌક્તિકગણાઃ શઙ્ખાશ્ચ શઙ્કામહે ॥ ૨૮॥

માને શમ્ભુશિરઃપ્રહારચરિતં નૈવ ત્વદિચ્છાકૃતં
જાને દેવિ! પદાબ્જયોસ્તુ પુરજિન્મૂર્દ્ધ્ના વિરોધાદિદમ્ ।
એતે પાદનખાંશુબદ્ધકલહાઃ શીતાંશુમન્દાકિની-
ભોગીન્દ્રાઃ કિલ શઙ્કરસ્ય શિરસા શઙ્કાં વિના રક્ષિતાઃ ॥ ૨૯॥

દેવિ! ત્વચ્ચરણોચ્ચલન્નખઘૃણિશ્રેણીષુ લીનો નમ-
ન્નાભાતિ સ્ફટિકાચલસ્ફુટતટીશાયીવ સાયન્નટઃ ।
હંસાલીન ઇવ સ્વયં કમલભૂઃ ક્ષીરાબ્ધિશાયીવ ચ
શ્રીભર્તા મઘવાપિ નાકસરિતિ સ્નાયન્નિવાલોક્યતે ॥ ૩૦॥

ડોલાકેલિવિધૌ હિમાચલશિલાદેશે સમભ્યાહતાત્-
પાદાગ્રાત્તવ યાનિ યાવકરસપ્રસ્યન્દનાન્યમ્બિકે! ।
તાન્યભ્યાગતસુમ્ભસઙ્ગરભવદ્રક્તામ્બુવિસ્તારણા-
બિન્દુક્ષેપનિભાનિ નન્દદમરીવન્ધ્યાનિ વન્દામહે ॥ ૩૧॥

ડોલાકેલિષુ યં હિમાચલશિલાલગ્નં વનેવાસિનો
ભક્ત્યા યોગિવરાસ્ત્રિપુણ્ડ્રકલિતે લિમ્પન્તિ ફાલાન્તરે ।
યં સિદ્ધપ્રમદાઃ સમેત્ય તિલકં કુર્વન્તિ નત્વા મુહુ-
સ્તં દાક્ષાયણિ! તે કદા નુ પદયોરીક્ષેય લાક્ષારસમ્ ? ॥ ૩૨॥

દેવિ! ત્વં મુરવૈરિણઃ પ્રણમને યત્કિઞ્ચિદાકુઞ્ચય
શ્રીપાદામ્બૂજમન્યથાસ્ય શિરસિ ત્વત્પાદલાક્ષાઞ્ચિતે ।
શ્રીભૂમ્યોરિતરપ્રણામકૃતમિત્યન્યોન્યમાશઙ્કયા
રોષવ્યાકુલયોશ્ચિરં સ ભગવાન્ જાયેત પર્યાકુલઃ ॥ ૩૩॥

પ્રાગુદ્વાહવિધૌ હિમાચલસદસ્યશ્માધિરોપાય ય-
ન્ન સ્પ્રક્ષ્યામિ વિયદ્ધુનીમિતિ પુનઃ સત્યં વિધાતું ચ યત્ ।
દૈત્યોત્ક્ષેપણસાહસે વિરચિતે સંવાહનાર્થં ચ યત્-
તત્પાદગ્રહણત્રયં વિજયતે શર્વેણિ શર્વાણિ! તે ॥ ૩૪॥

સુમ્ભસ્તે કિલ દેવિ! રાગકલહે પાદપ્રહારોત્સવં
લબ્ધું કાઙ્ક્ષિતવાનુપાયમિહ ખલ્વજ્ઞો ન વિજ્ઞાતવાન્ ।
યદ્યાયોત્સ્યત ઘોરમાહિષવપુર્ધારી સ વૈરી તતઃ
પ્રાપ્સ્યાનિષ્યત મૂર્ધ્નિ કોમલરુચા પાદારવિન્દેન તે ॥ ૩૫॥

આનમ્રે ગિરિશે પદપ્રહરણે દત્તે ભવત્યા રુષા
"નાથે! કિં મહિષોહા"મિત્યભિહિતે દેવેન તસ્મિન્ ક્ષણે ।

આલિખ્યાકલિતસ્મિતાસુ, પુનરપ્યુદ્દામપુષ્યદ્રુષ-
સ્તન્મૌલૌ જયતિ દ્વિતીયમપિ તે પાદાબ્જસન્તાડનમ્ ॥ ૩૬॥

પાદાગ્રં તવ સઙ્ગરશ્રમવશાદાક્ષારિલાક્ષારસં
વિન્યસ્તં મૃગનાયકોપરિ ચિરાજ્જીયાદગેન્દ્રાત્મજે! ।
યત્કાન્ત્યૈવ ચ લોહિતો મૃગપતિર્દૈત્યપ્રહારોદ્ગલ-
દ્રક્તામ્ભઃકણિકા વહન્નપિ તથા નામાનિ વૈમાનિકૈઃ ॥ ૩૭॥

નૈવાલિમ્પ નિલિમ્પમૂર્દ્ધસુ, ન વા સિંહોપરિ ત્યજ્યતાં
મા ચેદં મહિષસ્ય મૂર્દ્ધ્નિ રભસાદાલિપ્ય લોલુપ્યતામ્ ।
પત્યુર્મૌલિનદીજલે પરમિદં સઙ્ક્ષાલનીયં ત્વયે-
ત્યાલીકેલિગિરો જયન્તિ ગિરિજે! ત્વત્પાદલાક્ષાર્પણે ॥ ૩૮॥

નત્વૈવ પ્રથમં ત્વદઙ્ઘ્રિકમલં તૌ પુષ્પવન્તાવુભૌ
ત્રૈલોક્યં મહસાભિભૂય ચરતો વ્યોમાન્તરપ્રાન્તરે ।
નાથે! તૌ કથમન્યથા પરિગલલ્લાક્ષારસક્ષાલિતૌ
વીક્ષ્યેતે ભૃશશોણિબિમ્બમુદયારમ્ભે પ્રિયમ્ભાવુકૌ ॥ ૩૯॥

ત્રૈલોક્યં વશયન્તિ, પાપપટલીમુચ્ચાટયન્ત્યુચ્ચકૈ-
ર્વિદ્વેષં જનયન્ત્યધર્મવિષયે પ્રસ્તમ્ભયન્ત્યાપદઃ ।
આકર્ષન્ત્યભિવાઞ્છિતાનિ મહિષસ્વર્વૈરિણો મારણા-
શ્ચિત્રં! ત્વત્પદસિદ્ધચૂર્ણનિવહાઃ ષટ્કર્મણાં સાધકાઃ ॥ ૪૦॥

કિં કલ્પદ્રુમપઞ્ચકં પ્રણમતામાકાઙ્ક્ષિતાપાદને
કિં પઞ્ચાયુધબાણપઞ્ચકમિદં મારારિસમ્મોહને ।
સૂક્ષ્મં કિઞ્ચન પઞ્ચભૂતવપુષો વિશ્વસ્ય કિં કારણં
ત્વત્પાદાઙ્ગુલિપઞ્ચકાત્મકમિદં કિં ભાતિ શમ્ભોઃ પ્રિયે! ॥ ૪૧॥

ડોલાકેલિષુ દૂરદૂરગમને પ્રેઙ્ખોલનાવિભ્રમે
મેદિન્યામનિપાતિતં જયતિ તે નાથે! પદામ્ભોરુહમ્ ।
ભક્ત્યા સન્નમતાં ત્વદાનનગલદ્ગાનામૃતામૂર્ચ્છયા
ભૂપૃષ્ઠે ચિરશાયિનાં દિવિષદામાઘટ્ટનાસાધ્વસાત્ ॥ ૪૨॥

મઞ્જીરપ્રસરન્મસારસુષમારૂપા કલિન્દાત્મજા
સ્વચ્છચ્છાયનખાંશુસઞ્ચયમયી ગઙ્ગા ચ સઙ્ગામુકા ।
શોણઃ પાદરુચાં ચયશ્ચ મિલિતો યેન ત્વદગ્રે, તતો
મજ્જન્તીવ નમન્તિ તત્ર મુનયઃ સર્વેઽપિ શર્વાઙ્ગને ॥ ૪૩॥

મઞ્જીરાર્પિતશક્રનીલશકલશ્રીચઞ્ચલીકાઞ્ચિતં
રાજદ્રેણુવિભૂષિતં પરમહંસાલીભિરાસેવિતમ્ ।
ત્વત્પાદાગ્રસરોજમઙ્ગુલિદલચ્છાયભિરાભાસુરં
વિષ્વગ્રોચિનખાંશુજાલપયસિ સ્વચ્છે સમુચ્છોભતે ॥ ૪૪॥

મઞ્જીરસ્વનમઞ્જુવિષ્કિરરવે તત્સઙ્ગિનીલોપલ-
ચ્છાયારૂપતમોલવે નખમિષાદક્ષીણતારાગણે ।
સન્ધ્યારાગનિભસ્વકાન્તિપટલે ત્વત્પાદમૂલાત્મક-
પ્રત્યૂષોપગમે હિ દેવિ! લભતે લોકઃ પ્રબોધોદયમ્ ॥ ૪૫॥

વિદ્યામુક્તિરમાવધૂષુ નિતરાં કામાતુરા માનવા-
સ્તપ્તાસ્ત્વન્નખકાન્તિચન્દનરસૈરાલિપ્ય ગાત્રં નિજમ્ ।
ત્વત્પાદાબ્જરુચિપ્રવાલનિચિતે ભૂમીતલે શેરતે
નિત્યં દેવિ! ભવત્કૃપાપ્રિયસખીવિશ્વાસતઃ કેવલમ્ ॥ ૪૬॥

મઞ્જીરક્વણિતૈઃ ક્ષિપન્નિવ મુહુઃ શ્રીમન્નખાંશૂદ્ગમૈ-
ર્દૈત્યેન્દ્રં પ્રહસન્નિવારુણરુચા રુષ્યન્નિવાસ્મૈ ભૃશમ્ ।
ધીરાયાં ત્વયિ નિર્વિકારમનસિ ત્વત્પાદ એવ સ્ફુટં
પુષ્ણન્ વૈરિવિકારમેષ મહિષધ્વંસી પરિત્રાયતામ્ ॥ ૪૭॥

ક્ષિપ્રં દેવિ! શિરસ્પન્દને મહિષં પિષ્ટ્વા તતોઽધઃ પદં
દિત્સન્ત્યાં ત્વયિ કણ્ઠભઞ્જનભિયા કણ્ઠીરવે વિદ્રુતે ।
મેદિન્યામપિ ભીતિકમ્પિતતનૌ પ્રેમત્વરાશાલિના
શર્વેણૈવ નિજાઙ્કસીમ્નિ નિહિતં પાદદ્વયં તે જયેત્ ॥ ૪૮॥

પૂર્વં દેવિ! પદામ્બુજેન મહિષપ્રધ્વંસનાભ્યાસતઃ
પશ્ચાત્કુત્સિતસુમ્ભદૈત્યવિજયોઽપ્યેવં કૃતઃ કિં ત્વયા? ।
નો ચેદ્ભાતિ કથં કુસુમ્ભવિજયી પાદાબ્જદેશોઽયમિ-
ત્યાલાપે ગિરિશસ્ય તદ્વિજયતે મન્દસ્મિતં દેવિ! તે ॥ ૪૯॥

બિભ્રાણેન મનોજ્ઞયાવકરસં મઞ્જુધ્વનન્નૂપુર-
શ્લેષાલઙ્કૃતિશાલિના નખમણીજાતપ્રસાદશ્રિયા ।
એકેનૈવ પદેન દેવિ! મહિષધ્વંસે મહીયસ્તરઃ
શ્લોકોયં રચિતસ્ત્વયેતિ વિબુધાઃ સંશ્લાઘનં કુર્વતે ॥ ૫૦॥

ત્વં શમ્ભોર્મહિષી ભવસ્યગસુતે! તેનોપહાસાય તે

દૈત્યોઽયાં મહિષીભવન્નુપગતઃ, સોઽયં કથં ક્ષમ્યતે ? ।
ઇત્થં નૂપુરનિઃસ્વનૈરિવ વદન્ પાદસ્ત્વદીયો રુષા
શસ્ત્રપ્રગ્રહણાત્પુરૈવ મહિષં પિષ્ણન્ પરિત્રાયતામ્ ॥ ૫૧॥

દેવ્યા પઙ્કશયોઽદ્ય કોઽપિ મહિષચ્છદ્મા મહાન્ કણ્ટકઃ
પાદેનાહત ઇત્યુદૂઢહસિતં સખ્યા સમાવેદિતે ।
સદ્યઃ કણ્ટકશાલિના કરતલેનાસાદ્ય પાદામ્બુજં
ગૃહ્ણન્નાર્તિવિનોદનાય ગિરિશો જીયાત્પ્રિયસ્તે શિવે! ॥ ૫૨॥

ત્વત્પાદાઙ્ગુલિપલ્લવૈરગસુતે! દેવિ! સ્વયં પઞ્ચભિઃ
પઞ્ચત્વં ગમિતો મહાસુર ઇતિ સ્વાત્માનુરૂપં કૃતમ્ ।
એતૈરેવ નતો જનસ્ત્રિદશતાં નીતો, મહેશઃ પુન-
ર્લક્ષત્વં ગમિતઃ પ્રસૂનધનુષો વિસ્માપનં તદ્વયમ્ ॥ ૫૩॥

બ્રાહ્મં માધવનં ચ વાહનમહો મન્દૈર્ગતૈર્નિન્દિતં
ધાવલ્યેન નખત્વિષાં વિહસિતો વાહોઽપિ માહેશ્વરઃ ।
ઇત્થં વાહનવૈરિતાં ભજતિ તે પાદસ્તતો મન્મહે
કાત્યાયન્યમુના ન્યઘાનિ મહિષઃ કાર્ત્તાન્તવાહભ્રમાત્ ॥ ૫૪॥

સીમન્તપ્રકરે સુરેન્દ્રસુદૃશાં સિન્દૂરરેખાત્મના
માણિક્યદ્યુતિસઞ્જ્ઞયૈવ મકુટીકોટીષુ દૈત્યદ્રુહામ્ ।
શમ્ભોર્મૂર્ધ્નિ જટાઘટારુણરુચિવ્યાજેન પાદપ્રભૈ-
વૈકા તે પરિણામમેતિ કરુણામૂર્તે! ગિરીન્દ્રાત્મજે! ॥ ૫૫॥

નો કેશઃ પરમાશ્રયઃ સુમનસાં, પાદાબ્જરેણુશ્ચ તે
નો મન્દારસિતા પરં સ્મિતરુચિર્મઞ્જીરયોશ્ચ દ્વયી ।
નો બાહુઃ કલહં સમેત્ય જયતિ, ત્વદ્યાનલીલાપ્યસૌ
નો શુમ્ભત્તરલાક્ષમાનનમિદં, પાદામ્બુજં ચામ્બિકે! ॥ ૫૬॥

નાથે! તાવકવાહસિંહચકિતાસ્ત્વત્પાદમૂલે નતા
નૂનં બભ્રમુરભ્રમુપ્રિયમુખા દિક્કુમ્ભિવીરાશ્ચિરમ્ ।
નોચેદેષ કથં તદુન્નતશિરસ્સિન્દૂરસન્દોહજો
રાગસ્તે ચરણામ્બુજે પરિણમન્નદ્યાપિ વિદ્યોતતે ॥ ૫૭॥

ત્વત્પાદોઽયમજાશ્રિતશ્ચ રુચિરસ્પર્શાન્વિતો યોગિના-
મન્તઃસ્થાકૃતિરૂષ્મભાક્ ચ મહિષપ્રધ્વંસનપ્રક્રમે ।
એવં ખલ્વખિલાક્ષરાત્મકમમું શૈલેન્દ્રકન્યે! કથં

ભાષન્તે નતવર્ગબન્ધુમપવર્ગાલમ્બનં વા જનાઃ? ॥ ૫૮॥

ઉન્મીલન્નખમણ્ડલીહિમકણઃ, શોણપ્રભાગૈરિકં
બિભ્રાણઃ, પરિશોભમાનકટકો, ભૂયો વનૈકાશ્રયઃ ।
ગાયત્સિદ્ધવધૂનિષેવિતતલઃ પાદસ્ત્વદીયઃ શિવે!
રાજત્યેષ હિમાદ્રિપાદવદિદં યુક્તં હિમાદ્રેઃ સુતે! ॥ ૫૯॥

દિક્પાલૈર્દશભિઃ પૃથક્પૃથગયં ત્વત્પાદયોરર્પિતો
દૃશ્યો ભક્ત્યનુરાગ એવ દશધા શોણાઙ્ગુલિશ્રીમિષાત્ ।
પાદાભ્યામપિ તાન્ પ્રતિ પ્રકટિતા નૂનં પ્રસાદાઙ્કુરા
દૃશ્યન્તે નખકાન્તિપઙ્ક્તિદશકવ્યાજેન શૈલાત્મજે! ॥ ૬૦॥

મેઘાનાં કુલિશસ્ય ચાપ્રતિહતા ધારાઃ ક્રમન્તાં ચિરં
નો નશ્યેન્મદદાનવારિવિભવો નાકસ્ય નાગસ્ય ચ ।
પુત્રોઽયં મમ સૈનિકાશ્ચ દધતાં નિત્યં જયન્તઃ સુખં
ત્વત્પાદામ્બુજપાતિનઃ સુરપતેરિત્થં જયન્ત્યર્થનાઃ ॥ ૬૧॥

આજ્યાસક્તકરૈર્દ્વિજન્મભિરહં હૂયેય, નો દાનવૈઃ
સ્વાહારોચિતમસ્તુ પાર્શ્વમનિશં, તાદૃક્ ચ હવ્યં લભૈ ।
રક્ષાવાનિતિ ભૂતિમાનિતિ ચ મે શબ્દપ્રસિદ્ધ્યા શિવે!
નોપેક્ષ્યોઽહમિતિ ત્વદઙ્ઘ્રિનમને જીયાસુરગ્નેર્ગિરઃ ॥ ૬૧॥

“ત્વત્ભક્તાઘમબુદ્ધિપૂર્વલિખિતં સ્યાચ્ચેત્ક્ષમેથાઃ શિવે!
કાન્તસ્તે મયિ રોષવાન્, કુરુ પુનસ્તસ્યાર્દ્રભાવં શનૈઃ ।
દેવિ ત્વં મહિષાભિહન્ત્રિ! ચકિતં ત્રાયસ્વ મે વાહનં”,
કાલસ્યેતિ જયન્તિ તે પદનતૌ લોલસ્ય સમ્પ્રાર્થનાઃ ॥ ૬૩॥

ધર્માચારપરોઽહમિત્યવમતો રક્ષોભિરેકાન્વયૈ-
ર્મહ્યં દેવિ વિનિન્દિતા દિશમદુર્જાતિદ્વિષશ્ચામરાઃ ।
દૈવાદિત્યુભયચ્યુતો વિશરણો રક્ષ્યોઽહમિત્યાદય-
સ્ત્વત્પાદપ્રણતૌ જયન્તિ નિરૃતેરત્યાકુલાઃ પ્રાર્થનાઃ ॥ ૬૪॥

મત્પુત્ર્યા મમ વા મુકુન્દગૃહતાભાગ્યં ન સઙ્ક્ષીયતાં
માહં પાયિષિ કુમ્ભજેન મુનિના કલ્પાન્તસૂર્યેણ વા ।
દ્વેધા મે સુરવાહિનીદયિતતા સાધુ ત્વયા રક્ષ્યતાં
ત્વત્પાદામ્બુજપાતિનો જલપતેરિત્થં જયન્ત્યર્થનાઃ ॥ ૬૫॥

વિશ્વપ્રાણમયી ત્વમેવ, મમ તુ પ્રાહુર્જગત્પ્રાણતાં
સર્વસ્યાપિ સદા ગતિર્હિ ભવતી, મામેવમાહુર્જનાઃ ।
લજ્જાપાદકમીદૃશં જનનિ! નઃ, કિં કુર્મહે, પાહિમા-
મિત્યેવં પવનસ્ય તે પદનતૌ વાચો જયન્ત્યાકુલાઃ ॥ ૬૬॥

શઙ્ખોલ્લાસિગલોજ્જ્વલે! સમકરે! પદ્મેન, કુન્દસ્મિતે!
પાદાગ્રાદૃતકચ્છપે! મુખમહાપદ્મે! મુકુન્દાશ્રિતે! ।
ઇત્યસ્મન્નિધિગાત્રિ! નીલનયને! ચર્ચાત્મિકે! પાહિમા-
મિત્થં પાદનતિઃ શિવે! વિજયતે સખ્યુઃ કુબેરસ્ય તે ॥ ૬૭॥

સન્નામેષુ ભવત્પદામ્બુજનખચ્છાયાં જટાસઙ્ગિનીં
ગઙ્ગેત્યાલિજના વદન્તિ વિતથં મા ભૂર્મુધા કોપિની ।
દૃષ્ટિર્મય્યયિ! નીયતાં, પરુષમપ્યેકં વચો દીયતા-
મીશાનસ્ય ભવાનિ! તે પદનતાવિત્થં જયન્ત્યર્થનાઃ ॥ ૬૮॥

નાભીતોઽભવમાદિતસ્તવ બલાત્ પશ્ચાદભીતોઽસ્મ્યહં
ત્ર્યક્ષેણ ત્રિમુખીકૃતોઽપિ ચતુરાસ્યોઽહં તવૈવ સ્તવૈઃ ।
ત્વં વિશ્વાત્મતયોપજન્ય ન પુનઃ સ્રષ્ટારમાખ્યાહિ મા-
મિત્થં દેવિ! જયન્તિ તે પદનતૌ વાણીપતેર્વાણયઃ ॥ ૬૯॥

આશીરસ્તિ મુખે, વિડમ્બયતિ માં ભૂયોઽપિ ચાશીઃસ્પૃહા
ભોગાઃ સન્તિ સહસ્રધા, પુનરહં ભોગાન્ કથં પ્રાર્થયે? ।
શેષોઽહં સ્પૃહયામ્યશેષસુખમિત્યેતચ્ચ હાસાસ્પદં,
નાથે! ચિન્તય સર્વમિત્યહિપતેસ્ત્વત્પાદપાતો જયેત્ ॥ ૭૦॥

પાર્વત્યાઃ પદમત્ર દૃશ્યમિતિ વા પાદે ભવત્વેન વા
સાધુત્વાત્તદુપાસ્તયે હિતતયા પદ્યાન્યમૂનિ સ્ફુટમ્ ।
સૈષા મુક્તિપુરીગિરીન્દ્રતનયા ભક્તેન નારાયણે-
નાબદ્ધા ખલુ સપ્તતિર્દિશતુ વઃ કલ્યાણહલ્લોહલમ્ ॥

Shri Narayana Bhatta, the author of this work is more famous for his work Narayaneeyam. Narayaneeyam was composed in his younger days. It is said that he had a vision (dream) in which Krishna appeared to him and commanded him to go to Mukkola Bhagavati (Devi) temple in north Kerala. He went there and stayed there worshipping the Goddess till his

last days. This temple is also known as Muktisthala. It is said that the poet attained Mukti there. It was during his stay at Mukkola that he composed "Sripadasaptati", seventy verses on the divine feet of the Goddess. It is assumed that he composed only 70 verses because he was 70 years old when he composed this work.

Encoded by Ramu, Ramesh Natarajan, Shibin PK, Sugesh,
Achari, Rajmohan, Ranjana, Jayati, and Shankara
Proofread by Shankara, PSA Easwaran

---

*shrIpAdasaptati by shrInArAyaNabhaTTa*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*